# Suvarnamala Stutih

# સુવર્ણમાલાસ્તુતિઃ

## Document Information

Text title : Suvarnamala Stutih

File name : suvarNamaalaa.itx

Category : varNamAlA, shiva, shankarAchArya

Location : doc_shiva

Author : Traditional

Transliterated by : Subramanian Ganesh, NA

Proofread by : NA, Jagannadha Rao, Rajani Arjun Shankar

Latest update : August 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2024

*sanskritdocuments.org*

# સુવર્ણમાલાસ્તુતિઃ

અથ કથમપિ મદ્રસનાં ત્વદ્ગુણલેશૈર્વિશોધયામિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧॥

આખણ્ડલમદખણ્ડનપણ્ડિત તણ્ડુપ્રિય ચણ્ડીશ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨॥

ઇભચર્મામ્બર શમ્બરરિપુવપુરપહરણોજ્જ્વલનયન વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩॥

ઈશ ગિરીશ નરેશ પરેશ મહેશ બિલેશયભૂષણ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪॥

ઉમયા દિવ્યસુમઙ્ગલવિગ્રહયાલિઙ્ગિતવામાઙ્ગ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૫॥

ઊરીકુરુ મામજ્ઞમનાથં દૂરીકુરુ મે દુરિતં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૬॥

ઋષિવરમાનસહંસ ચરાચરજનનસ્થિતિલયકારણ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૭॥

ૠક્ષાધીશકિરીટ મહોક્ષારૂઢ વિધૃતરુદ્રાક્ષ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૮॥

ૡવર્ણદ્વન્દ્વમવૃન્તસુકુસુમમિવાઙ્ઘ્રૌ તવાર્પયામિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૯॥

એકં સદિતિ શ્રુત્યા ત્વમેવ સદસીત્યુપાસ્મહે મૃડ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૦॥

ઐક્યં નિજભક્તેભ્યો વિતરસિ વિશ્વમ્ભરોઽત્ર સાક્ષી ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૧॥

ઓમિતિ તવ નિર્દેષ્ટ્રી માયાસ્માકં મૃડોપકર્ત્રી ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૨॥

ઔદાસ્યં સ્ફુટયતિ વિષયેષુ દિગમ્બરતા ચ તવૈવ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૩॥

અન્તઃકરણવિશુદ્ધિં ભક્તિં ચ ત્વયિ સતીં પ્રદેહિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૪॥

અસ્તોપાધિસમસ્તવ્યસ્તૈ રૂપૈર્જગન્મયોઽસિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૫॥

કરુણાવરુણાલય મયિ દાસ ઉદાસસ્તવોચિતો ન હિ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૬॥

ખલસહવાસં વિઘટય ઘટય સતામેવ સઙ્ગમનિશં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૭॥

ગરલં જગદુપકૃતયે ગિલિતં ભવતા સમોઽસ્તિ કોઽત્ર વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૮॥

ઘનસારગૌરગાત્ર પ્રચુરજટાજૂટબદ્ધગઙ્ગ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૧૯॥

જ્ઞપ્તિઃ સર્વશરીરેષ્વખણ્ડિતા યા વિભાતિ સા ત્વં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૦॥

ચપલં મમ હૃદયકપિં વિષયદ્રુચરં દૃઢં બધાન વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૧॥

છાયા સ્થાણોરપિ તવ તાપં નમતાં હરત્યહો શિવ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૨॥

જય કૈલાસનિવાસ પ્રમથગણાધીશ ભૂસુરાર્ચિત ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૩॥

ઝણુતકઝિઙ્કિણુઝણુતત્કિટતકશબ્દૈર્નટસિ મહાનટ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૪॥

જ્ઞાનં વિક્ષેપાવૃતિરહિતં કુરુ મે ગુરુસ્ત્વમેવ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૫॥

ટઙ્કારસ્તવ ધનુષો દલયતિ હૃદયં દ્વિષામશનિરિવ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૬ ॥

ઠાકૃતિરિવ તવ માયા બહિરન્તઃ શૂન્યરૂપિણી ખલુ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૭ ॥

ડમ્બરમમ્બુરુહામપિ દલયત્યનઘં ત્વદઙ્ઘ્રિયુગલં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૮ ॥

ઢક્કાક્ષસૂત્રશૂલદ્રુહિણકરોટીસમુલ્લસત્કર ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૨૯ ॥

ણાકારગર્ભિણી ચેચ્છુભદા તે શરગતિર્નૃણામિહ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૦ ॥

તવ મન્વતિસઞ્જપતઃ સદ્યસ્તરતિ નરો હિ ભવાબ્ધિં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૧ ॥

થૂત્કારસ્તસ્ય મુખે ભૂયાત્તે નામ નાસ્તિ યસ્ય વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૨ ॥

દયનીયશ્ચ દયાલુઃ કોઽસ્તિ મદન્યસ્ત્વદન્ય ઇહ વદ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૩ ॥

ધર્મસ્થાપનદક્ષ ત્ર્યક્ષ ગુરો દક્ષયજ્ઞશિક્ષક ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૪ ॥

નનુ તાડિતોઽસિ ધનુષા લુબ્ધધિયા ત્વં પુરા નરેણ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૫ ॥

પરિમાતું તવ મૂર્તિં નાલમજસ્તત્પરાત્પરોઽસિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૬ ॥

ફલમિહ નૃતયા જનુષસ્ત્વત્પદસેવા સનાતનેશ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૭ ॥

બલમારોગ્યં ચાયુસ્ત્વદ્ગુણરુચિતાં ચિરં પ્રદેહિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૮ ॥

ભગવન્ ભર્ગ ભયાપહ ભૂતપતે ભૂતિભૂષિતાઙ્ગ વિભો ।

સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૩૯ ॥

મહિમા તવ ન હિ માતિ શ્રુતિષુ હિમાનીધરાત્મજાધવ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૦ ॥

યમનિયમાદિભિરઙ્ગૈર્યમિનો હૃદયે ભજન્તિ સ ત્વં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૧ ॥

રજ્જાવહિરિવ શુક્તૌ રજતમિવ ત્વયિ જગન્તિ ભાન્તિ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૨ ॥

લબ્ધ્વા ભવત્પ્રસાદાચ્ચક્રં વિધુરવતિ લોકમખિલં ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૩ ॥

વસુધાતદ્ધરતચ્છયરથમૌર્વીશરપરાકૃતાસુર ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૪ ॥

શર્વ દેવ સર્વોત્તમ સર્વદ દુર્વૃત્તગર્વહરણ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૫ ॥

ષડ્રિપુષડૂર્મિષડ્વિકારહર સન્મુખ ષણ્મુખજનક વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૬ ॥

સત્યં જ્ઞાનમનન્તં બ્રહ્મેત્યેતલ્લક્ષણલક્ષિત ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૭ ॥

હાહાહૂહૂમુખસુરગાયકગીતાપદાનપદ્ય વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૮ ॥

ળાદિર્ન હિ પ્રયોગસ્તદન્તમિહ મઙ્ગળં સદાઽસ્તુ વિભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૪૯ ॥

ક્ષણમિવ દિવસાન્નેષ્યતિ ત્વત્પદસેવાક્ષણોત્સુકઃ શિવ ભો ।
સામ્બ સદાશિવ શમ્ભો શઙ્કર શરણં મે તવ ચરણયુગમ્ ॥ ૫૦ ॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીશઙ્કરભગવતઃ કૃતૌ સુવર્ણમાલાસ્તુતિઃ સમ્પૂર્ણા ॥

Suvarṇamālā Stutiḥ સુવર્ણમાલા સ્તુતિઃ composed by ĀdiŚaṅkarācārya આદિશઙ્કરાચાર્ય comprises of 50 śloka-s શ્લોકાઃ eulogizing Śiva શિવ; with each of the shloka in the

sequence beginning with the successive Varṇa વર્ણ from the chosen set of the Devanāgarī Varṇamālā દેવનાગરી વર્ણમાલા starting from letter અ through ક્ષ.

Encoded partial by Subramanian Ganesh, extended NA
Proofread by NA, Jagannadha Rao, Rajani Arjun Shankar

---

*Suvarnamala Stutih*

pdf was typeset on August 21, 2024

Please send corrections to *sanskrit@cheerful.com*